# योगवीजम् ।

---

श्रीयुक्त भुवनचन्द्र वसाक महोदयस्य प्रार्थनाया

श्रीनवचन्द्र शिरोमणिना परिशोधितम् ।

श्रीभुवनचन्द्र वसाकेन प्रकाशितम् ।

( कलिकाता निमतला घाट ष्ट्रीट ८ संख्यक

भवन हइते प्रकाशित । )

---

कलिकाता राजधान्याम्

श्रीयुक्त भुवनचन्द्र वसाक संस्थापित संवाद

ज्ञानरत्नाकर यन्त्रे तद्द्वारैव मुद्रितम् ।

( निमतला घाट ष्ट्रीट ८ संख्यक भवन । )

१८८६

# योगबीजम् ।

श्रीयुक्त भुवनचन्द्र वसाक महोदयस्य प्रार्थनाया

श्रीनवचन्द्र शिरोमणिना परिशोधितम् ।

श्रीभुवनचन्द्र वसाकेन प्रकाशितम् ।

( कलिकाता निमतला घाट ष्ट्रीट ८ संख्यक

भवन हइते प्रकाशित । )

---

कलिकाता राजधान्याम्

श्रीयुक्त भुवनचन्द्र वसाक संस्थापित संवाद

ज्ञानरत्नाकर यन्त्रे तद्द्वारैव मुद्रितम् ।

( निमतला घाट ष्ट्रीट ८ संख्यक भवन । )

१८८६

## अथ योगबीजम् ।

श्रीदेव्युवाच ।

नमस्ते आदिनाथाय विश्वनाथाय ते नमः ।
नमस्ते विश्वरूपाय विश्वातीताय ते नमः ॥ १ ॥
उत्पत्तिस्थितिसंहारकारिणे क्लेशहारिणे ।
नमस्ते देवदेवेश नमस्ते परमात्मने ॥ २ ॥
नमस्ते परिपूर्णाय जगदानन्दहेतवे ।
सर्व्वे जीवाः सुखैर्दुःखैर्मायाजालेन वेष्टिताः ॥ ३ ॥
तेषां मुक्तिः कथं देव कृपया वद शङ्कर ।
सर्व्वसिद्धिकरो मार्गो मायाजालनिकृन्तनः ॥ ४ ॥
जन्ममृत्युजराव्याधिनाशकः सुखदो भव ।
नानामार्गास्त्वया देव कथितास्तु महेश्वरः ॥ ५ ॥
अधुना मोक्षदं मार्गं ब्रूहि योगविदाम्बर ।

ईश्वर उवाच ।

यद्रा येन विमुच्यन्ते नाथमार्गमतः परम् ॥ ६ ॥
तमहं कथयिष्यामि तव प्रीत्या सुरेश्वरि ।
नानामार्गैस्तु दुष्प्राप्यं कैवल्यं परमं पदम् ॥ ७ ॥
सिद्धमार्गेण लभ्येत नान्यथा शिवभाषितम् ।
अनेकशतसंख्याभिस्तर्कव्याकरणादिभिः ॥ ८ ॥
पतिताः शास्त्रजालेषु प्रज्ञया ते विमोहिताः ।

अनिर्वाच्यं पदं वक्तुं न शक्यते सुरैरपि ॥ ९ ॥
स्वात्मप्रकाशरूपं तत् किं शास्त्रेण प्रकाश्यते ।
निष्कलनिर्मलं शान्तं सर्वातीतं निरामयम् ॥ १० ॥
तदेतज्जीवरूपेण पुण्यपापफलै र्हतम् ।

श्रीदेव्युवाच ।

परमात्मपदं नित्यं तत् कथं जीवतां गतम् ॥ ११ ॥
तत्त्वातीतं महादेव प्रसादात् कथयस्व मे ।

ईश्वर उवाच ।

सर्वभावं यदातीतं ज्ञानरूपं निरञ्जनम् ॥ १२ ॥
वारिवत् स्फुरितं स्वस्मिं स्तत्राहङ्कार उत्थितः ।
पञ्चात्मकमभूत् पिण्डं धातुबद्धं गुणात्मकम् ॥ १३ ॥
सुखदुःखैः सदा युक्तं जीवभावनया कुलम् ।
तेन जीवाभिधा प्रोक्ता विशुद्धे परमात्मनि ॥ १४ ॥
कामः क्रोधो भयं चिन्ता लोभ मोहमदारुजः ।
जरा मृत्युश्च कार्पण्यं शोकनिद्रा क्षुधा तृषा ॥ १५ ॥
द्वेषोलज्जा सुखं दुःखं विषादो हर्ष एव च ।
जाग्रत्स्वप्न सुषुप्तिश्च शङ्का गर्वस्तथैव च ॥ १६ ॥
एभिर्दोषैर्विमुक्तः सन् सजीवः शिव एव हि ।
तस्मात् दोषविनाशार्थं मुपायं कथयामि ते ॥ १७ ॥
ज्ञानं केचित् वदन्त्यत्र केवलं तन्न सिद्धये ।
योगहीनं कथं ज्ञानं मोक्षदं भवतीश्वरि ॥ १८ ॥
योगोऽपि ज्ञानहीनस्तु न क्षमो मोक्षकर्मणि ।

देव्युवाच ।

अज्ञानादेव संसारो ज्ञानादेव विमुच्यते ॥ १९ ॥

योगेनैषान्तु किं कार्य्यं मे प्रसन्नगिरा वद ।
ईश्वर उवाच ।
सत्यमेतत् त्वयोक्तं ते कथयामि सुरेश्वरि ॥ २० ॥
ज्ञानस्वरूपमेवादौ ज्ञेयं ज्ञाने च साधनम् ।
अज्ञानं कीदृश ञ्चेति प्रविचार्य्यं विवेकिना ॥ २१ ॥
ज्ञातं येन निजं रूपं कैवल्यं परमं शिवम् ।
असौ दोषैर्विमुक्तः किं कामक्रोधभयादिभिः ॥ २२ ॥
सर्व्वदोषैर्वृतो जीवः कथं ज्ञानेन मुच्यते ।
देव्युवाच ।
स्वात्मरूपं यदा ज्ञातं पूर्णं तद्व्यापकं तथा ॥ २३ ॥
कामक्रोधादि दोषाणां स्वरूपान्नास्ति भिन्नता ।
पश्चात्तस्य विधिः किञ्च निषेधोऽपि कथं भवेत् ॥ २४ ॥
विवेकी सर्व्वदा मुक्तः संसारभ्रमवर्ज्जितः ।
ईश्वर उवाच ।
परिपूर्णस्वरूपं तत् सत्यमेतद्वरानने ॥ २५ ॥
सकलं निष्कलञ्चैव पूर्णत्वाच्च तदेव हि ।
कलना स्फुर्त्तिरूपेण संसारभ्रमतां गतम् ॥ २६ ॥
एतद्रूपं समायातः स कथं मोहसागरे ।
निष्कलं निर्म्मलं साक्षात् स्वरूपं गगनोपमम् ॥ २७ ॥
उत्पत्तिस्थितिसंहारस्फुर्त्तिज्ञानविवर्ज्जितम् ।
निमज्जति वरारोहे त्यक्त्वा विद्यां पुनः पुनः ॥ २८ ॥
सुखदुःखादि मोहेषु यथा संसारिणां स्थितिः ।
तथा ज्ञानी यदा तिष्ठेत् वासनावसितस्तदा ॥ २९ ॥
तयोर्नास्ति विशेषोऽत्र समा संसारभावना ।

ज्ञानञ्चेदीदृशं जातमज्ञानं कीदृशं पुनः ॥ ३० ॥
ज्ञाननिष्ठो विरक्तोऽपि धर्मज्ञो विजितेन्द्रियः ।
विना देवोऽपि योगेन न मोक्षं लभते प्रिये ॥ ३१ ॥

श्रीदेव्युवाच ।

अन्यत् किञ्चित् परिज्ञेयं ज्ञानिनां नास्ति शङ्कर ।
विरक्तात्मकनिष्ठानां कथं मोक्षो भवेन्न तु ॥ ३२ ॥

ईश्वर उवाच ।

अपक्काः परिपक्काश्च द्विविधा देहिनः स्मृताः ।
अपक्का योगहीनास्तु पक्का योगेन देहिनः ॥ ३३ ॥
पक्को योगाग्निना देही अजड़ः शोकवर्ज्जितः ।
जड़स्तत्पार्थिवो ज्ञेयः अपक्को दुःखदो भवेत् ॥ ३४ ॥
ध्यानस्थोऽसौ तथाप्येवमिन्द्रियैर्व्विवशो भवेत् ।
अतिगाढ़ं नियम्यापि तथा शनैः प्रबोध्यते ॥ ३५ ॥
शीतोष्णसुखदुःखाद्यै र्व्याधिभिर्मानसैस्तथा ।
अन्यैर्नानाविधैर्जीवैः शस्त्राग्निजलमारुतैः ॥ ३६ ॥
शरीरं पीड्यते चास्य चित्तं संक्षुभ्यते ततः ।
प्राणापानविपत्तौ तु क्षोभमायाति मारुतः ॥ ३७ ॥
ततो दुःखशतैर्व्याप्तं चित्तं क्षुब्धं भवेन्नृणाम् ।
देहावसानसमये चित्ते यद्यद्विभावयेत् ॥ ३८ ॥
तत्तदेव भवेज्जीव इत्येवं जन्मकारणम् ।
देहान्ते किं भवेज्जन्म तन्न जानन्ति मानवाः ॥ ३९ ॥
तस्माज्ज्ञानञ्च वैराग्यं जपः स्यात् केवलं श्रमः ।
पिपीलिका यदा लग्ना देहे ध्यानाद्विमुच्यते ॥ ४० ॥
असौ किं वृश्चिकैर्दष्टो देहान्ते वा कथं सुखी ।

तस्मान्मूढ़ा न जानन्ति मिथ्यातर्केण वेष्टिताः ॥ ४१ ॥
अहङ्कृति र्यदा यस्य नष्टा भवति तस्य वै ।
देहः स तु भवेन्नष्टो व्याधयस्तस्य किं पुनः ॥ ४२ ॥
जलाग्नि शस्त्रवातादि बाधा कस्य भविष्यति ।
यथा यथा परिक्षीणा पुष्टा चाहङ्कृतिर्भवेत् ॥ ४३ ॥
अभ्यासेनास्य नश्यन्ति प्रवर्त्तन्ते प्रमादयः ।
कारणेन विना कार्य्यं न कदाचन जायते ॥ ४४ ॥
अहङ्कारं विना तद्वद्देहे दुःखं कथं भवेत् ।
श्रीदेव्युवाच ।
योगिनः कथ्यमानास्तु किं ते व्याहरन्ति न ॥ ४५ ॥
तैः कथं व्यवहारस्तु क्रियते वद शङ्कर ।
ईश्वर उवाच ।
शरीरेण जिताः सर्व्वे शरीरं योगिभिर्जितम् ॥ ४६ ॥
तत्कथं कुरुते तेषां सुखदुःखादिकं फलम् ।
इन्द्रियाणि मनोबुद्धिः कामक्रोधादिकं जितम् ॥४७ ॥
तेनैव विजितं सर्व्वं नासौ केनापि बाध्यते ।
महाभूतानि तत्त्वानि संहृतानि क्रमेण च ॥ ४८ ॥
सप्तधातुमयो देहो दग्धो योगाग्निना शनैः ।
देवैरपि न लक्ष्येत योगदेहो महाबलः ॥ ४९ ॥
छेदबन्धै विमुक्तोऽसौ नानाशक्तिधरः परः ।
यथाकाशस्तथा देहः आकाशादपि निर्मलः ॥ ५० ॥
सूक्ष्मात् सूक्ष्मतरो देहः स्थूलात् स्थूलो जड़ो जड़ः ।
इच्छारूपो हि योगीन्द्रः स्वतन्त्रस्त्वजरामर ॥ ५१ ॥
क्रीड़ति त्रिषु लोकेषु लीलया यत्र कुत्रचित् ।

अचिन्त्यशक्तिमान् योगी नानारूपाणि धारयन् ॥ ५२ ॥
संहारेच्च पुनस्तानि स्वेच्छया विजितेन्द्रियः ।
मरणं तस्य किं देवि पृच्छसीन्दुसमानने ॥ ५३ ॥
नासौ मरणमाप्नोति पुनर्योगबलेन तत् ।
पुरैव मृत एवासौ मृतस्य मरणं कुतः ॥ ५४ ॥
मरणं यत्र सर्वेषां तत्रासौ सखि जीवति ।
यत्र जीवन्ति मूढ़ास्तु तत्रासौ म्रियते सदा ॥ ५५ ॥
कर्त्तव्यं नैव तस्यास्ति कृतेनासौ न लिप्यते ।
जीवन्मुक्तः सदा स्वस्थः सर्व्वदोषविवर्ज्जितः ॥ ५६ ॥
विरक्ताज्ञानिनस्त्वन्ये देहेन विजिताः सदा ।
ते कथं योगिभिस्तुल्या मांसपिण्डार्त्तदेहिनः ॥ ५७ ॥

देव्युवाच ।

ज्ञानिनस्तु मृता ये वै तेषां भवति कीदृशीम् ।
गतिं कथय देवेश कारुण्यामृत वारिधे ॥ ५८ ॥

ईश्वर उवाच ।

देहान्ते ज्ञानिभिः पुण्यात् पापान्न फलमाप्यते ।
यादृशन्तु भवेत्तत्र भुक्त्वा ज्ञानी पुनर्भवेत् ॥ ५९ ॥
पुण्योपुण्येन लभते सिद्धेन सह सङ्गतिः ।
ततः सिद्धस्य कृपया योगी भवति नान्यथा ॥ ६० ॥
ततो नश्यति संसारो नान्यथा शिवभाषितम् ।

देव्युवाच ।

ज्ञानादेव हि मोक्षञ्च वदन्ति ज्ञानिनः सदा ॥ ६१ ॥
नकथं सिध्यति ततो योगः संमोक्षदो भवेत् ।

ईश्वर उवाच ।

ज्ञानेनैव हि मोक्षोहि ब्याक्यं तेषान्तु नान्यथा ॥६२॥
सर्व्वे वदन्ति खड्गेन जयो भवति तर्हि कः ।
विना युद्धेन वीर्य्येण कथं जय मवाप्नुयात् ॥ ६३ ॥
तथा योगेन रहितं ज्ञानं मोक्षाय नो भवेत् ।
ज्ञानेनैव विना योगो न सिध्यति कदाचन ॥ ६४॥
तस्मादव वरारोहे तयोर्भेदो न विद्यते ।
जन्मान्तरैश्च बहुभि र्योगो ज्ञानेन लभ्यते ॥ ६५ ॥
ज्ञानन्तु जन्मनैकेन योगादेव प्रजायते ।
तस्माद्योगात् परतरो नास्ति मार्गस्तु मोक्षदः ॥ ६६॥

देव्युवाच ।

बहुभिर्जन्मभिर्ज्ञानाद्योगः संप्राप्यते कथम् ।
योगात्तु जन्मनैकेन कथं ज्ञान मवाप्यते ॥ ६७ ॥

ईश्वर उवाच ।

प्रविचार्य्य चिरं ज्ञानान् मुक्तोऽहमिति मन्यते ।
किमसौ मननादेव मुक्तो भवति तत्क्षणात् ॥ ६८ ॥
पुमान् जन्मान्तरशतै र्योगादेव विमुच्यते ।
न तथा भवतो योगात् जन्ममृत्यू पुनः पुनः ॥ ६९ ॥
प्राणापानसमा योगाच्चन्द्रसूर्य्यैक्यता भवेत् ।
सप्तधातुमयं देहमग्निना प्रदहेद्बुधः ॥ ७० ॥
व्याधयस्तस्य नश्यन्ति छेदयातादिका कथा ।
तथासौ परमाणु स्वरूपो देह्यवतिष्ठते ॥ ७१ ॥
किं पुनर्बहुनोक्तेन मरणं नास्ति तस्य वै ।
देहेव दृश्यते लोके दग्धकर्पटवत् स्वयम् ॥ ७२॥

चित्तं प्राणेन सम्बन्धं सर्व्वजीवेषु संस्थितम् ।
रज्जौ यद्वत् परीबद्धा रज्जी तद्वदिमे मते ॥ ७३ ॥
नानाविधैर्विचारैस्तु न साध्यं जायते मनः ।
तस्मात्तस्य जयोपायः प्राण एव हि नान्यथा ॥ ७४ ॥
तर्कैर्जल्पैः शास्त्रजालैर्युक्तिभिर्मन्त्रभेषजैः ।
न वशा जायते प्राणः सिद्धोपायं विना प्रिये ॥ ७५ ॥
उपायं तस्य विज्ञाय योगमार्गे प्रवर्त्तते ।
खण्डज्ञानेन तेनैव जायते क्लेशभाक् नरः ॥ ७६ ॥
ये जित्वा पवनं मोहाद्योगमिच्छन्ति योगिनः ।
सोऽपक्वकुम्भमारुह्य सागरं तर्त्तुमिच्छति ॥ ७७ ॥
यस्य प्राणो विलीनस्तत् साधके जीविते सति ।
पिण्डो न पतित स्तस्य चित्तं दोषैः प्रमुच्यते ॥ ७८ ॥
शुद्धे चेतसि तस्यैव स्वात्मज्ञानं प्रकाशते ।
तस्माज् ज्ञानं भवेद्योगाज्जन्म नैकेन पार्व्वति ॥ ७९ ॥
तस्माद्योगं तमेवादौ साधको नित्यमभ्यसेत् ।
मुमुक्षुभिः प्राणजयः कर्त्तव्यो मोक्षहेतवे ॥ ८० ॥
योगात् परतरं पुण्यं योगात् परतरं सुखम् ।
योगात् परतरं सूक्ष्मं योगमार्गात् परं न हि ॥ ८१ ॥

श्रीदेव्युवाच ।

योगः क उच्यते देव योगाख्यः सोऽपि कीदृशः ।
योगेन वा भवेत् किञ्च तत्सर्व्वं वद शङ्कर ॥ ८२ ॥

ईश्वर उवाच ।

योऽपानप्राणयोर्योगः स्वरजरेतसोस्तथा ।
सूर्य्याचन्द्रमसोर्योगो जीवात्मपरमात्मनोः ॥ ८३ ॥

एवन्तु द्वन्द्वजालस्य संयोगो योग उच्यते ।
अधुना संप्रवक्ष्यामि योगाभ्यासस्य लक्षणम् ॥ ८४ ॥
मरुज्जयो यस्य सिध्येत् सेवयेत्तं गुरुं सदा ।
गुरुवक्त्रप्रसादेन कुर्य्यात् प्राणजयं बुधः ॥ ८५ ॥
वितस्तिप्रमितं दैर्घ्यं विस्तरे चतुरङ्गुलम् ।
मृदुलं धवलं प्रोक्तं वेष्टनाम्बरलक्षणम् ॥ ८६ ॥
निरुध्य मारुतं गाढं शक्तिचालन युक्तितः ।
अष्टधा कुण्डलीभूतामृजुं कर्त्तुं तु कुण्डलीम् ॥ ८७ ॥
भानोराकुञ्चनं कुर्य्यात् कुण्डलीं चालयेत्ततः ।
मृत्युवक्त्रगतस्यापि तस्य मृत्युभयं कुतः ॥ ८८ ॥
एतदेव परं गुह्यं कथितन्तु मया तव ।
वज्रासनगतोनित्यं मासार्द्धन्तु समभ्यसेत् ॥ ८९ ॥
वायुना ज्वलितो वह्निः कुण्डलीमनिशं दहेत् ।
सन्तप्ता साग्निना नाड़ी शक्ति स्त्रैलोक्यमोहिनी ॥ ९० ॥
प्रविशेद्वज्रदण्डे तु सुषुम्नावदनान्तरे ।
वायुना वह्निना सार्द्धं ब्रह्मग्रन्थिं भिनत्ति सा ॥ ९१ ॥
विष्णुग्रन्थिं ततो भित्त्वा रुद्रग्रन्थिञ्च तिष्ठति ।
ततस्तु कुम्भके गाढ़े पूरयित्वा पुनः पुनः ॥ ९२ ॥
तथाभ्यसेत् सूर्य्यभेद मुज्जायीं वापि शीतलम् ॥ ९३ ॥
भस्त्रीञ्च सहितो नाम स्याच्चतुष्टय कुम्भकम् ।
बन्धत्रयेणसंयुक्तः केवलः प्राप्तिकारकः ॥ ९४ ॥
अथास्य लक्षणं सम्यक् कथयामि समासतः ।
एकाकिना समुपगम्य विविक्तदेशं
प्राणादि रूपममृतं परमार्थतत्त्वम् ।

लम्बाग्निनाधृतिमता परिभावितव्यं
संसाररोगहरमौषधमद्वितीयम् ॥ ९५ ॥
सूर्य्यनाड्या समाकृष्य वायूमभ्यासयोगिनाम् ।
विधिवत् कुम्भकं कृत्वा रेचयेत् शीतरश्मिना ॥ ९६ ॥
उदरे वातदोषघ्नं कण्ठदोषं निहन्ति च ।
मुहुर्मुहुरिदं कार्य्यं सूर्य्यभेदमुदाहृतम् ॥ ९७ ॥
नाड़ीभ्यां वायुमाकृष्य कुण्डल्यापार्श्वयोर्नरः ।
धारयेदुदरे सोपि रेचयेदिड़या सुधीः ॥ ९८ ॥
कण्ठे कफादि दोषघ्नं शरीराग्निविवर्द्धनम् ।
शिरोजलोदधारा तु गत रोग विनाशनम् ॥ ९९ ॥
गच्छतस्तिष्ठतः कार्य्यं उज्जयाख्यन्तु कुम्भकम् ।
मुखेन वायुं संगृह्य प्राण रन्ध्रे विरेचयेत् ॥ १०० ॥
शीतलीकरणञ्चेदं हन्ति पित्तं तथा ज्वरम् ।
स्तनयो रथ भस्त्रेव लोहकारस्य वेगतः ॥ १०१ ॥
रेचयेत् पूरयेत् वायुमाश्रमं देहगंधिया ।
यदाश्रमोभवेद्देहे तथा सूर्य्येण रेचयेत् ॥ १०२ ॥
कण्ठसंकोचनं कृत्वा पुनश्चन्द्रेण रेचयेत् ।
वातपित्तश्लेष्महरं शरीराग्नि विवर्द्धनम् ॥ १०३ ॥
कुण्डलीरोधकं वक्रभावघ्नं सुखदं शुभम् ।
ब्रह्मनाड़ीमुखं संस्थ कफाद्यर्गल नाशनम् ॥ १०४ ॥
सम्यक् गात्र समुद्भूत ग्रन्थित्रय विभेदकम् ।
विशेषेणैव कर्त्तव्यं भस्त्राख्यं कुम्भकन्त्विदम् ॥ १०५ ॥
बन्धत्रयमथेदानीं प्रवच्यामि यथार्थवत् ।
नित्यं कृतेन येनासौ वायोर्जय मवाप्नुयात् ॥ १०६ ॥

चतुर्णामपि भेदानां कुम्भके समुपस्थिते ।
बन्धत्रयमिदं कार्य्यं वक्ष्यमाणं मया स्फुटम् ॥ १०७ ॥
प्रथमो मूलबन्धस्तु द्वितीय उड्डियानकः ।
जालन्धरस्तृतीयस्तु लक्षणं कथयाम्यहम् ॥ १०८ ॥
गुदं पाष्र्ण्या तु संपीड्य वायुमाकुञ्चयेत् बलात् ।
वारम्वारं तथा चोर्द्ध्वं समायाति समीरणः ॥ १०९ ॥
प्राणापानं नादबिन्दू मूलबन्धेन चैकताम् ।
गत्वा योगस्य संसिद्धिं यच्छते नात्र संशयः ॥ ११० ॥
कुम्भकान्ते रेचकान्ते कर्त्तव्यस्तूड्डियानकः ।
बद्धो येन सुषुम्नायां प्राणस्तूड्डीयते ततः ॥ १११ ॥
तस्मादुड्डियानाख्योऽयं योगिभिः समुदाहृतः ।
उड्डियानस्तु सहजं गुरुणा कथितं मदा ॥ ११२ ॥
अभ्यासेद्स्वतन्त्रस्तु वृद्धोपि तरुणायते ।
नाभेरूर्द्ध्वमधश्चापि प्राणं कुर्य्यात् प्रयत्नतः ॥ ११३ ॥
षण्मासमभ्यसेन्मृत्युं जयत्येव न संशयः ।
पूरकान्ते तु कर्त्तव्यो बन्धो जालन्धराभिधः ॥ ११४ ॥
कण्ठसंकोचरूपोऽसौ वायुमार्ग निरोधकः ।
कण्ठमाकुञ्च्य हृदये स्थापयेद्दृढमिच्छया ॥ ११५ ॥
बन्धो जालन्धराख्योयममृताव्ययकारकः ।
अधस्तात् कुञ्चनेनाशु कण्ठसङ्कोचनेन च ॥ ११६ ॥
मध्यमा भ्रमणेन स्यात् सप्राणो ब्रह्मनाडिगः ।
वज्रासनस्थितो योगी चालयित्वा तु कुण्डलीम् ॥ ११७ ॥
कुर्य्यादनन्तरं भस्त्रीं कुण्डलीमाशु रोधयेत् ।
भिद्यन्ते ग्रन्थयो वंशे तप्तलोह शलाकया ॥ ११८ ॥

तथैव पृष्ठवंशे स्यात् ग्रन्थि भेदस्तु वायुना ।
पिपीलिका यत्र लग्ना कण्डुस्तत्र प्रवर्त्तते ॥ ११९ ॥
सुषुम्नया तथाभ्यासात् सततं वायुना भवेत् ।
रुद्रग्रन्थिं ततोभित्त्वा सैव याति शिवात्मकम् ॥ १२० ॥
चन्द्रसूर्य्यौ समौकृत्वा तयोर्योगः प्रवर्त्तते ।
गुण त्रयादतीतः स्यात् ग्रन्थित्रय विभेदकः ॥ १२१ ॥
शिवशक्ति समायोगात् जायते परमा स्थितिः ।
यथाकरीकरेणैव पानीयं प्रपिबेत्तथा ॥ १२२ ॥
सुषुम्ना वज्रनलिनः परमाणं ग्रहेत् सदा ।
वज्रदण्डेतु संभूता मनयोश्चैक विंशतिः ॥ १२३ ॥
सुषुम्नायां स्थिताः सर्व्वे सूत्रे मणिगणाइव ।
मोक्षमार्गे प्रसिद्धा सा सुषुम्ना विश्वधारिणी ॥ १२४ ॥
यत्रवै निर्ज्जितः कालश्चन्द्र सूर्य्य निबन्धनात् ।
आपूर्य्य कुम्भितोवायु र्वहि र्नोयाति साधके ॥ १२५ ॥
पुनः पुनस्तद्वदेतत् पश्चिमद्वार लक्षणम् ।
पूरितस्तु नवद्वारैरोधत् कुम्भकताङ्गताः ॥ १२६ ॥
प्रविशेत् सर्व्वगात्रेषु वायुः पश्चिम मार्गतः ।
रेचके क्षीणतां याते पूरकं शोषयेत् सदा ॥ १२७ ॥
सएव नाथ सङ्केतं सिद्ध सङ्केत लक्षणः ।
गुरु प्रसादात् मरुदेव साधितः
स्तेनैव चित्तं पवनेन साधितम् ।
सएव योगी स जितेन्द्रियः
सुखी मूढ़ा नजानन्ति कुतर्कवादिनः ॥ १२८ ॥
चित्तं हि नष्टं यदि मारुते स्यां
तत्प्रलीनोमरुतोपि नाशः

नैचेत् यदि स्यान्नतु तस्य शास्त्रं
नात्म प्रतीतिर्न गुरुर्न मोक्षः ॥ १२९ ॥
तुम्बिकारुधिरं यद्वज्जलादाकर्षति ध्रुवम् ।
ब्रह्मनाड़ी तथाधातून् सन्तताभ्यासयोगतः ॥ १३० ॥
अनेनाभ्यासयोगेन नित्यमासनबन्धतः ।
चित्तं विलीनतामेति विन्दुर्नोपात्यधस्तथा ॥१३१॥
रेचकं पूरकं कृत्वा वायुना स्थीयते चिरम् ।
नाना नदाः प्रवर्त्तन्ते संस्रवेच्चन्द्रमण्डलम् ॥ १३२ ॥
नश्यन्ति क्षुत्पिपासाद्याः सर्वदोषास्तथा सदा ।
स्वरूपे सच्चिदानन्दे स्थितिमाप्नोति केवलम् ॥१३३ ॥
कथितं तु तवप्रीत्या एतदभ्यासलक्षणम् ।
मन्त्रोहठोलयोराजा योगोऽन्तर भूमिका क्रमात् ॥१३४॥
एकएव चतुर्धायं महायोगोभिधीयते ।

श्रीदेव्युवाच ।

यथयेदं महादेव योगतत्त्वं चतुर्विधम् ।
भूमिकांशानुसारेण यथाभूतं क्रमान्मम ॥ १३५ ॥

ईश्वर उवाच ।

सकारेण वहिर्याति हकारेण विशेत् महत् ।
हंस हंसेति मन्त्रोऽयं सर्व्वेजीवा जपन्तितम् ॥ १३६ ॥
गुरुवाक्यात् सुषुम्नायां विपरीतोभवेज्जपः ।
सोऽहं सोऽमिति प्राप्तोमन्त्रयोगः स उच्यते ॥ १३७ ॥
प्रतीतिर्वायुयोगाच्च जायते पश्चिमे पथि ।
हकारेण तु सूर्य्योसौ ठकारेणेन्दुरुच्यते ॥ १३८ ॥
सूर्य्यचन्द्रमसोरैक्यम् हठ इत्यभिधीयते ।

हठेन ग्रस्यते जाड्यं सर्व्वदोषसमुद्भवम् ॥१३९॥
क्षेत्रज्ञ परमात्मानौ तयोरैक्यं यदा भवेत् ।
तदैक्ये साधिते देवि चित्तं याति विलीनताम् ॥१४०॥
पवन स्थैर्य्यमायाति लययोगोदये सति ।
लयात् संप्राप्यते सौख्यं स्वात्मानन्दपरं पदम् ॥१४१॥
अणिमादि पदं प्राप्ते राजते राजयोगतः ।
प्राणापान समायोगे ज्ञेयं योगचतुष्टयम् ॥ १४२ ॥
संक्षेपात् कथितं देवि नान्यथा शिवभाषितम् ।

श्री देव्युवाच ।

कथयत्वं महादेव काकमर्कटयोर्मतम् ।
अन्यग्रन्थे त्वयोक्तन्तु एकमेकाद्वयोर्गतिः ॥ १४३ ॥

ईश्वर उवाच ।

सत्यमेतत्त्वयोक्तं ते कथयामि सुरेश्वरि ।
आदिनाथमहामार्ग एकएवहि नान्यथा ॥ १३४ ॥
द्विधैव संप्रतीयेत जन्मान्तर विभेदतः ।
क्रमेण प्राप्यते प्राणमभ्यासादेव नान्यथा ॥ १४५ ॥
एकेनैव शरीरेण योगाभ्यासात् शनैः शनैः ।
चिरात् संप्राप्यते सिद्धिः मर्कटक्रम एव सः ॥ १४६ ॥
योगसिद्धिं विना देहः प्रमादाद्यदिनश्यति ।
पूर्व्ववासनयायुक्तः शरीरं नान्यमाप्नुयात् ॥ १४७ ॥
ततः पुण्यवशात् सिद्धिर्गुरुणा सह सङ्गतिः ।
पश्चिमद्वारमार्गेण जायते त्वरितं फलम् ॥ १४८ ॥
पूर्व्वजन्मकृताभ्यासात् सत्वरं फलमश्नुते ।
एतदेवहि विज्ञेयं तत्काकमतमुच्यते ॥ १४९ ॥

तस्मात् काकमतान्नास्ति अभ्यासाख्यमतःपरम् ।
न कर्मणा विना देवि योगसिद्धिः प्रजायते ॥ १५० ॥
ज्ञानं वा स्वर्गभोगो वा पुण्यहीनै र्न लभ्यते ।
तस्मात् कार्य्यं तदेवं यत् यस्य हि साधनम् ॥ १५१ ॥
तेनैव प्राप्यते सिद्धिर्नान्यथा शिवभाषितम् ।
नानाविधाः क्रमाः काष्ठाः सहजं बालयादिकम् ॥१५२॥
नतु तन्मोक्षमार्गे स्यात् प्रसिद्धं पश्चिमं विना ।
अभ्यासस्य फलं देवि कथयाम्यधुना स्फुटम् ॥ १५३ ॥
आदौ रोगाः प्रणश्यन्ति पश्चाज्जाड्यं शरीरजम् ।
ततः शमरसोभूत्वा चन्द्रोवर्षत्यनारतम् ॥ १५४ ॥
धातुः स्वं संग्रसेद्वह्निः पवनेन समन्ततः ।
नाना नादाः प्रवर्त्तन्ते मार्द्दवं स्यात् कलेवरे ॥ १५५ ॥
जित्वा वृष्ट्यादिकं जाड्यं खेचरः प्रसरेन्नरः ।
सर्व्वज्ञोसौ भवेत् कामरूपः पवनवेगवान् ॥१५६ ॥
क्रीड़न्ति त्रिषु लोकेषु जायन्ते सिद्धयोऽखिलाः ।
कर्पूरे लीयमाने किं काठिन्यं तत्र विद्यते ॥ १५७ ॥
अहङ्कारो लयते यत्र देहे कठिनता कुतः ।
सर्व्वः स सर्व्वकर्त्ता च स्वतन्त्रो विश्वरूपवान् ॥ १५८ ॥
जीवन्मुक्तो भवेद्योगी जायते नात्र संशयः ।

श्रीदेवुवाच ।

यत्किञ्चित् कल्पनाजालं न तन्मोक्षाय शङ्कर ॥१५९॥
सिद्धयः किं करिष्यन्ति निर्व्विकल्पे चिदात्मनि ।
एवं मे संशयं नाथ छेत्तुमर्हसि पावन ॥ १६० ॥

ईश्वर उवाच ।

सत्यमेतत्त्वयोक्तं ते वदामि शृणु सुन्दरि ।
द्विविधाः सिद्धयो लोके कल्पिताः कल्पिताः शिवे ॥१६१॥
वनौषधि क्रियाकाल मन्त्रचेलादिसाधनात् ।
सिद्ध्यन्ति सिद्धयोयास्तु कल्पितास्ताः प्रकीर्त्तिताः ॥१६२॥
अनित्याः अल्पवीर्य्यास्ताः सिद्धयः साधनोद्भवाः ।
साधनेन विनाप्येवं जायते स्वत एवहि ॥ १६३ ॥
स्वात्मयोगैः कनिष्ठेषु स्वतन्त्रादीश्वरस्त्वतः ।
प्रहृताः सिद्धयो यास्ताः कल्पनारहिताः स्मृताः ॥१६४ ॥
सिद्धा नित्यामहावीर्य्या इच्छारूपाश्च योगजाः ।
चिरकालात् प्रजायन्ते वासनारहितेषु च ॥ १६५ ॥
तासुभाव्या महायोगात् परमात्मपदेऽव्यये ।
विना कार्य्यं सदा दोषं योगसिद्धस्य लक्षणम् ॥१६६॥
यथा काशीं समुद्दिश्य गच्छद्भिः पथिकैः पथि ।
नाना तीर्थानि दृश्यन्ते तथा मोक्षेतु सिद्धयः ॥ १६७ ॥
स्वयमेव प्रजायन्ते लाभालाभविवर्ज्जिते ।
योगमार्गे तथैवेदं सिद्धिजालं प्रवर्त्तते ॥ १६८ ॥
परीक्षकैः स्वर्णकारैर्हेम संप्रोच्यते यथा ।
सिद्धिभिर्लक्षयेत् सिद्धिं जीवन्मुक्तिं तथैवच ॥ १६९ ॥
अलौकिक गुणास्तस्य कदाचित् दृश्यते ध्रुवः ।
इत्येतत् कथितं देवि योगसिद्धस्य लक्षणम् ॥ १७० ॥
सिद्धिभिः परिहीनं तं नरं वन्धन्तु लक्षयेत् ।
अजरामर पिण्डो यो जीवन्मुक्तः स एवहि ॥ १७१ ॥
ये श्वकुक्कुट कीटाद्याम्मृतिं संप्राप्नुवन्तिते ।

तैत्रां किं पिण्डपातेन मुक्तिर्भवति सुन्दरि ॥ १७२ ॥
नवहिं प्राणआयाति पिण्डस्य पतनं कुतः ।
पिण्डपातेन या मुक्तिः सामुक्तिः कथ्यते पुनः ॥ १७३ ॥
देहो ब्रह्मत्वमायाति जलतां सैन्धवं यथा ।
अनन्यतां यदायाति तदामुक्तः स उच्यते ॥ १७४ ॥
चिन्मयानि शरीराणि इन्द्रियाणि तथैवच ।
यथा ब्रह्मत्वमापन्नं यथैवाज्यजलत्ववत् ॥ १७५ ॥
एतत्ते कथितं देवि तव प्रीत्या सुरेश्वरि ।
गोपनोयं प्रयत्नेन क्रूरे धूर्त्ते शठे खले । १८६ ॥
दातव्यं शिवभक्तेषु तदाचार पदेषु च ।
योगवीजं महागुह्यं यन्मया प्रकटीकृतम् ॥ १७७ ॥
श्रीदेव्युवाच ।
गतोमे संशयो नाथ कृपया तव शङ्कर ।
नमस्ते योगराजाय सर्व्वज्ञाय नमोनमः ॥ १७८ ॥
इति श्रीयोगवीजं समाप्तम् ।